॥ षट्प्रश्नोपनिषत्प्रारंभः ॥

श्रीमद्धनुमद्भीममध्वांतर्गतरामकृष्णवेदव्यासात्मकलक्ष्मीहयग्रीवायनमः॥ हरिः ॐ ॥ सुकेशाचभारद्वाजः
शैब्यश्चसत्यकामःसौर्यायणीचगार्ग्यःकौसल्यश्चाश्वलायनोभार्गवोवैदर्भिःकबंधीकात्यायनस्तेहैतेब्रह्मपराब्र
ह्मनिष्ठाःपरंब्रह्मान्वेषमाणाएषहवैतत्सर्वंवक्ष्यतीतितेहसमित्पाणयोभगवंतंपिप्पलादमुपसन्नाः ॥१॥ तान्हस
ऋषिरुवाच । भूयएवतपसाब्रह्मचर्येणश्रद्धयासंवत्सरंसंवत्स्यथ । यथाकामंप्रश्नान्पृच्छत । यदिविज्ञास्या
मःसर्वंहवोवक्ष्यामइति ॥२॥अथकबंधीकात्यायनउपेत्यपप्रच्छ । भगवन्कुतोहवाइमाःप्रजाःप्रजायंतइति।
तस्मैसहोवाच । प्रजाकामोहवैप्रजापतिः । सतपोतप्यत ॥३॥ समिथुनमुत्पादयते । रयिंचप्राणंचेत्येतौ
मेबहुधाप्रजाःकरिष्यतइति । आदित्योहवैप्राणोरयिरेवचंद्रमाः॥४॥ रयिर्वाएतत्सर्वंयन्मूर्तंचामूर्तंचतस्मा
न्मूर्तिरेवरयिः । अथादित्यउदयन्यत्प्राचींदिशंप्रविशतितेनप्राच्यान्प्राणान्रश्मिषुसन्निधत्ते । यद्दक्षिणांय
त्प्रतीचींयदुदीचींयदधोयदूर्ध्वंयदंतरादिशोयत्सर्वंप्रकाशयतितेनसर्वान्प्राणान्रश्मिषुसन्निधत्ते ॥५॥ सएष
वैश्वानरोविश्वरूपःप्राणोग्निरुदयते । तदेतदृचाभ्युक्तं । विश्वरूपंकरिणंजातवेदसंपरायणंज्योतिरेकंतपंतं।
सहस्ररश्मिःशतधावर्तमानःप्राणःप्रजानामुदयत्येषसूर्यः ॥६॥ संवत्सरोवैप्रजापतिः । तस्यायनेदक्षिणंचो

त्तरंच तद्येहवैतदिष्टापूर्तेकृतमित्युपासते । तेचांद्रमसमेवलोकमभिजयंते । तएवपुनरावर्तंते तस्मादेतेऋष
यःप्रजाकामादक्षिणंप्रतिपद्यंते । एषवैरयिर्यःपितृयाणः ॥ ७ ॥ अथोत्तरेणतपसाब्रह्मचर्येणश्रद्धयाविद्यया
त्मानमन्विष्यादित्यमभिजयंते । एतद्वैप्राणानामायतनमेतदमृतमभयमेतत्परायणमेतस्मान्नपुनरावर्तंत
इत्येषनिरोधः । तदेषश्लोकः । पंचपादंपितरंद्वादशाकृतिंदिवआहुःपरेअर्धेपुरीषिणं । अथेमेअन्यउपरेवि
चक्षणंसप्तचक्रेषळरआहुरर्पितमिति ॥८॥ मासोवैप्रजापतिः । तस्यकृष्णपक्षएवरयिःशुक्लःप्राणस्तस्मादेते
ऋषयःशुक्लइष्टिंकुर्वंति । इतरइतरस्मिन् । अहोरात्रोवैप्रजापतिस्तस्याहरेवप्राणोरात्रिरेवरयिः । प्राणंवाए
तेप्रस्कंदंतियेदिवारत्यासंयुज्यंते । ब्रह्मचर्यमेवतद्यद्रात्रौरत्यासंयुज्यते ॥९॥ अन्नंवैप्रजापतिस्ततोहवैतद्रे
तः । तस्मादिमाःप्रजाःप्रजायंतइति । तद्येहवैतत्प्रजापतिव्रतंचरंति । तेमिथुनमुत्पादयंते तेषामेवैषब्रह्म
लोकोयेषांतपोब्रह्मचर्यंयेषुसत्यंप्रतिष्ठितं । तेषामसौविरजोब्रह्मलोकोनयेषुजिह्ममनृतंनमायाचेति ॥ १० ॥
इतिप्रथमःप्रश्नः ॥१॥ अथहैनंभार्गवोवैदर्भिःपप्रच्छ । भगवन्कत्येवदेवाःप्रजाविधारयंते । कतरएतत्प्रका
शयंते । कःपुनरेषांवरिष्ठइति ॥१॥ तस्मैसहोवाच । आकाशोहवाएषदेवोवायुरग्निरापःपृथिवीवाङ्मनश्च

क्षुःश्रोत्रंच तेप्रकाश्याअभिवदंति । वयमेतद्बाणमवष्टभ्यविधारयामइति ॥ २॥ तान्वरिष्ठःप्राणउवाच ।
मामोहमापद्यथाहमेवैतत्पंचधात्मानंविभज्यैतद्बाणमवष्टभ्यविधारयामीति । तेऽश्रद्दधानाबभूवुः । सोभि
मानादूर्ध्वमुत्क्रमतइव तस्मिन्नुत्क्रामत्यथेतरेसर्वएवोत्क्रामंते । तस्मिंश्चप्रतिष्ठमानेसर्वएवप्रतिष्ठंते ॥३॥ तद्य
थामधुमक्षिकामधुकरराजानमुत्क्रामंतंसर्वाएवोत्क्रमंते । तस्मिंश्चप्रतिष्ठमानेसर्वाएवप्रतिष्ठंते । एवंवाङ्मनश्च
क्षुःश्रोत्रंच । तेप्रीताःप्राणंस्तुन्वंत्येषोग्निस्तपत्येषसूर्यएषपर्जन्योमघवानेषवायुरेषपृथिवीरयिर्देवःसदसच्चामृतं
चयत् ॥४॥ अराइवरथनाभौप्राणेसर्वंप्रतिष्ठितं । ऋचोयजुंषिसामानियज्ञःक्षत्रंचब्रह्मच । प्रजापतिश्चरसि
गर्भेत्वमेवप्रतिजायसे । तुभ्यंप्राणप्रजास्त्विमायत्प्राणैःप्रतितिष्ठसि । देवानामसिवह्नितमःपितॄणांप्रथमास्वधा ।
ऋषीणांचरितंसत्यमथर्वांगिरसामपि ॥ ५ ॥ इंद्रस्त्वंप्राणतेजसारुद्रोसिपरिरक्षिता । त्वमंतरिक्षेचरसिसूर्यस्त्वं
ज्योतिषांपतिः । यदात्वमभिवर्षस्यथेमाःप्राणतेप्रजाः । आनंदरूपास्तिष्ठंतिकामायान्नंभविष्यतीति । व्रात्य
स्त्वंप्राणैकऋषिरत्ताविश्वस्यसत्पतिः । वयमद्यस्यदातारःपितात्वंमातरिश्वनः ॥६॥ यातेतनूर्वाचिप्रतिष्ठितायाश्रोत्रेयाचचक्षुषि । यामनसिसंतताशिवांतांकुरुमोत्क्रमीः । प्राणस्यैतद्वशेसर्वंत्रिदिवेयत्प्रतिष्ठितं । मातेवपु

त्रात्रक्षस्वश्रीश्चप्रज्ञांविधेहिनइति ॥७॥ प्र०॥२॥ अथहैनंकौसल्यश्चाश्वलायनःपप्रच्छ । भगवन्कुतएषप्राणो
जायते । कथमायात्यस्मिन्शरीरे । आत्मानंवाप्रविभज्यकथंप्रतिष्ठते । केनोत्क्रमतेकथंबाह्यमभिधत्तेकथम
ध्यात्ममिति ॥१॥ तस्मैसहोवाचातिप्रश्नान्पृच्छसिब्रह्मिष्ठोसीति । तस्मात्तेहंब्रवीम्यात्मतएषप्राणोजायते । य
थैषापुरुषेच्छायाएतस्मिन्नेतदाततं ॥२॥ मनोकृतेनायात्यस्मिञ्छरीरे । यथासंम्राडेवाधिकृतान्विनियुंक्तए
तान्ग्रामानधितिष्ठस्वैतान्ग्रामानधितिष्ठस्वेत्येवमेवैषप्राणइतरान्प्राणान्पृथक्पृथगेवसन्निधत्ते ॥३॥ पायूपस्थे
ऽपानंचक्षुःश्रोत्रेमुखनासिकाभ्यांप्राणःस्वयंप्रतिष्ठते । मध्येतुसमानः । एषह्येतद्धुतमन्नंसमंनयतितस्मादेताः
सप्तार्चिषोभवंति । हृदिह्येषआत्मा ॥४॥ अत्रैतदेकशतंनाडीनां । तासांशतंशतमेकैकस्यांद्वासप्ततिंप्रतिशा
खानाडीसहस्राण्यासुव्यानश्चरत्यथैकयोर्ध्वमुदानः पुण्येनपुण्यंलोकंनयतिपापेनपापमुभाभ्यामेवमनुष्यलो
कं ॥५॥ आदित्योहवैबाह्यःप्राणउदयत्येषह्येनंचाक्षुषंप्राणमनुगृह्णानः पृथिव्यांयादेवतासैषापुरुषस्यापानमव
ष्टभ्यांतरायदाकाशःससमानोवायुर्व्यानस्तेजोहवाउदानः । तस्मादुपशांततेजाःपुनर्भवमिंद्रियैर्मनसिसंपद्य
मानैः ॥६॥ यच्चितस्तेनैषप्राणमायाति । प्राणस्तेजसायुक्तःसहात्मनायथासंकल्पितंलोकंनयति । यएवंविद्वा

न्प्राणंवेदनहास्यप्रजाहीयतेऽमृतोभवति। तदेषश्लोकः। उत्पत्तिमायतिंस्थानंविभुत्वंचैवपंचधा। अध्यात्मंचै
वप्राणस्यविज्ञायामृतमश्नुतेविज्ञायामृतमश्नुतइति ॥७॥ प्र०॥३॥ अथहैनंसौर्यायणीगार्ग्यःपप्रच्छ। भगव
न्नेतस्मिन्पुरुषेकानिस्वपंति कान्यस्मिन्जाग्रति। कतरएषदेवःस्वप्नान्पश्यति। कस्यैतत्सुखंभवतिकस्मिन्सर्वे
संप्रतिष्ठिताभवंतीति ॥ १ ॥ तस्मैसहोवाच। यथागार्ग्यमरीचयोर्कस्यास्तंगच्छतःसर्वाएतस्मिंस्तेजोमंडलए
कीभवंतिताःपुनरुदयतःप्रचरंत्येवंहवैतत्सर्वंपरेदेवेमनस्येकीभवति। तेनतर्ह्येषपुरुषोनशृणोतिनपश्यतिन
जिघ्रतिनरसयतेनस्पृशतेनाभिवदतेनादत्तेनानंदयतेनविसृजतेनेयायतेस्वपितीत्याचक्षते ॥२॥ प्राणाग्नय
एवैतस्मिन्पुरेजाग्रति गार्हपत्योहवाएषोपानोव्यानोऽन्वाहार्यपचनः। यद्गार्हपत्यात्प्रणीयते प्रणयनादाहव
नीयःप्राणः। यदुच्छ्वासनिःश्वासावेतावाहुतीसमंनयतिससमानोमनोहवावयजमानइष्टंफलमेवोदानः। सए
नंयजमानमहरहर्ब्रह्मगमयति ॥ ३ ॥ अत्रैषदेवःस्वप्नेमहिमानमनुभवतियंदृष्टंदृष्टमनुपश्यतिश्रुतंश्रुतमेवार्थ
मनुशृणोतिदेशदिगंतरेचप्रत्यनुभूतंपुनःपुनःप्रत्यनुभवति। दृष्टंचादृष्टंचश्रुतंचाश्रुतंचानुभूतंचाननुभूतंचस
च्चासच्चसर्वंपश्यतिसर्वःपश्यति सयदातेजसाभिभूतोभवत्यत्रैषदेवःस्वप्नान्नपश्यति ॥ अथयदेतस्मिञ्छरीरेसु

खंभवति ॥४॥ सयथासोम्यवयांसिवासोवृक्षंसंप्रतिष्ठंते। एवंहवैतत्सर्वंपरेआत्मनिसंप्रतिष्ठते । पृथिवीचपृथि
वीमात्राचापश्चापोमात्राचतेजश्चतेजोमात्राचवायुश्चवायुमात्राचाकाशश्चाकाशमात्राचचक्षुश्चद्रष्टव्यंचश्रो
त्रंचश्रोतव्यंचघ्राणंचघ्रातव्यंचरसनंचरसयितव्यंचत्वक्कस्पर्शयितव्यंचवाक्कवक्तव्यंचहस्तौचदातव्यंचपादौच
गंतव्यंचपायुश्चविसर्जयितव्यंचोपस्थश्चानंदयितव्यंचमनश्चमंतव्यंचबुद्धिश्चबोद्धव्यंचाहंकारश्चाहंकर्तव्यंच
चित्तंचचेतयितव्यंचतेजश्चविद्योतयितव्यंचप्राणश्चविधारयितव्यंच ॥५॥ एषहिद्रष्टास्प्रष्टाश्रोताघ्रातारसयि
तामंताबोद्धाकर्ताविज्ञानात्मापुरुषः। सयोहवैतदच्छायमशरीरमलोहितंशुभ्रमक्षरंवेदयतेयस्तुसोम्यससर्व
ज्ञःसर्वंभवति ।तदेषश्लोकः। विज्ञानात्मासहदेवैश्चसर्वैःप्राणाभूतानिसंप्रतिष्ठंतियत्र । तदेतदक्षरंवेदयतेय
स्तुसोम्यससर्वज्ञःसर्वमेवाविवेशेति ॥६॥ प्र० ॥४॥ अथहैनंशैब्यःसत्यकामःपप्रच्छ । सयोहवैतद्भगवन्मनु
ष्येषुप्रायणांतमोंकारमभिध्यायीतकतमंवावसतेनलोकंजयतीति ॥१॥ तस्मैसहोवाच । एतद्वैसत्यकामप
रंचापरंचब्रह्मयदोंकारः । तस्माद्विद्वानेतेनैवायनेनैकतरमन्वेति । सयद्येकमात्रमभिध्यायीतसतेनैवसंवे
दितस्तूर्णमेवजगत्यामभिसंपद्यते । तमृचोमनुष्यलोकमुपनयंते । ससतत्रतपसाब्रह्मचर्येणश्रद्धयासंपन्नोम

हिमानमनुभवति। अथयदिद्विमात्रेणमनसिसंपद्यतेसोंतरिक्षंयजुर्भिरुन्नीयतेसोमलोकंससोमलोकेविभूति

मनुभूयपुनरावर्तते । यःपुनरेतंत्रिमात्रेणोमित्येतेनैवाक्षरेणपरंपुरुषमभिध्यायीतसतेजसिसूर्येसंपन्नोयथा
पादोदरस्त्वचाविनिर्मुच्यतएवंहवैसपाप्मनाविनिर्मुक्तःससामभिरुन्नीयतेब्रह्मलोकं । सएतस्माज्जीवघनात्प
रात्परंपुरिशयंपुरुषमीक्षते ॥२॥ तदेतौश्लोकौभवतः। तिस्रोमात्रामृत्युमत्यःप्रयुक्ताअन्योन्यसक्ताअनविप्र
युक्ताः। क्रियासुबाह्याभ्यंतरमध्यमासुसम्यक्प्रयुक्तासुनकंपतेज्ञः। ऋग्भिरेतंयजुर्भिरंतरिक्षंसामभिर्यत्तत्क
वयोवेदयंते। तमोंकारेणैवायनेनान्वेतिविद्वान्यत्तच्छांतमजरममृतमभयंपरात्परंचेति ॥३॥ प्र० ॥५॥ अथ
हैनंसुकेशाभारद्वाजःपप्रच्छ। भगवन्हिरण्यनाभःकौसल्योराजपुत्रोमामुपेत्यैतंप्रश्नमपृच्छत। षोडशकलं
भारद्वाजपुरुषंवेत्थतंमह्यंब्रवीहीति। तमहंकुमारमब्रवंनाहमिमंवेदयद्यहमिममवेदिष्यंकथंतेनावक्ष्यमिति ।
समूलोवाएषपरिशुष्यतियोनृतमभिवदति तस्मान्नार्हाम्यनृतंवक्तुं।सतूष्णींरथमारुह्यप्रवव्राज।तंत्वापृच्छामि
क्वासौपुरुषइति॥१॥ तस्मैसहोवाच। इहैवांतःशरीरेसोम्यसपुरुषोयस्मिन्नेताःषोडशकलाःप्रभवंतीति।सईक्षां
चक्रेकस्मिन्न्वहमुत्क्रांतउत्क्रांतोभविष्यामिकस्मिन्वाप्रतिष्ठितेप्रतिष्ठास्यामीति। सप्राणमसृजतप्राणाच्छ्रद्धांखं

वायुर्ज्योतिरापःपृथिवींद्रियंमनोन्नमन्नाद्वीर्यंतपोमंत्राःकर्मलोकालोकेषुनामच॥२॥यथेमानद्यःस्यंदमानाःस
मुद्रायणाःसमुद्रंप्राप्यास्तंगच्छंतिभिद्येतेतासांनामरूपेसमुद्रइत्येवंप्रोच्यतेएवमेवास्यपरिद्रष्टुरिमाःषोडशक
लाःपुरुषायणाःपुरुषंप्राप्यास्तंगच्छंतिभिद्येतेचासांनामरूपेपुरुषइत्येवंप्रोच्यते।सएषोकलोमृतोभवति॥३॥
तदेषश्लोकः। अराइवरथनाभौकलायस्मिन्प्रतिष्ठिताः। तंवेद्यंपुरुषंवेदयथामावोमृत्युःपरिव्यथाइति। तान्हो
वाच। एतावदेवाहमेतत्परंब्रह्मवेदनातःपरमस्तीति। तेहितमर्चयंतस्त्वंहिनःपितायोस्माकमविद्यायाःपरंपा
रंतारयसीति। नमःपरमऋषिभ्योनमःपरमऋषिभ्यः ॥४॥प्र०॥६॥ इतिषट्प्रश्नोपनिषत्समाप्ता ॥ ॥
श्रीमद्धनुमद्भीममध्वांतर्गतरामकृष्णवेदव्यासात्मकलक्ष्मीहयग्रीवायनमः॥ ॐ॥ नमोभगवतेतस्मैप्राणादि
प्रभविष्णवे। अमंदानंदसांद्रायवासुदेवायवेधसे। प्रजानांपालनाद्विष्णुःप्रजापतिरितीरितः। सवायुंसूर्यना
मानंचंद्रनाम्नींसरस्वतीं। सूर्याचंद्रगतौदेवःससर्जपुरुषोत्तमः। तावाविश्यस्वयंविष्णुःसर्वसृष्टीःकरोत्यजः। अ
मूर्तस्थःसवायुस्तुमूर्तसंस्थासरस्वती। आदित्यस्थःसवायुस्तुप्राणानात्मनिसंनयेत्। प्राच्याःप्राणास्तथेंद्राद्या
दक्षिणाश्चयमादयः। प्रतीच्यावरुणाद्यास्तुसोमाद्याउत्तराःस्मृताः। शेषमित्रावथवाचीनौर्वींद्रकामावुदक्तनौ।

सभार्याःकोणपैःसार्धंचत्वारोदिशिदिश्यपि । संवत्सरस्थोभगवान्वागीरावयनस्थितौ । मासस्थितःसभगवा
न्पक्षयोर्वाक्कमारुतः। अहोरात्रेतुभगवान्प्राणोह्ययथचवाङ्गिशि । दंपत्योर्भगवान्विष्णुर्भार्यास्थातुसरस्वती ।
भर्तृस्थःसस्वयंवायुरेवंजानन्विमुच्यतइतिप्रजापतिसंहितायां ॥ प्रश्न०॥१॥ वायुरग्निरित्यत्रभूतवायुरुच्यते ।
प्राणशब्देनप्रधानवायुः ॥ प्रश्न०॥२॥ आत्मतः । परमात्मतः । विष्णोर्वायुःसमुत्पन्नोवायोःसर्वाश्चदेवताः ।
प्राणाद्यास्तान्नयन्प्राणआज्ञापयतिराजवत् । स्वयंचपंचरूपस्सन्दद्यान्मोक्षादिकंप्रभुरितिप्रभंजने ॥ प्रश्न०
॥३॥ रश्मीनामविशेषेपिह्यज्ञदृष्टिव्यपेक्षया । सूर्यस्यमंडलंयांतीत्युच्यंतेतददर्शनात् । एवंविष्णोस्तुसामीप्या
द्देवानांसुप्तिगस्यतु । व्यवहाराकरत्वाच्चएकीभावइतीर्यतइतिच । भगवतःशरीरवत्सादृश्ययुक्तेजीवेसुखंभव
ति । कस्यैतत्सुखंभवतीतिपृष्टत्वात् । नह्यचेतनस्यशरीरस्यसुखंभवति । यस्यात्माशरीरमितिचश्रुतिः।सादृ
श्याद्देहवज्जीवोविष्णोस्तस्यसुखंभवेत् । सुप्तौतस्यसुखार्थंहिभगवान्सुप्तिमानयेदितिच ॥प्रश्न०॥४॥ प्रणवेन
हरिंध्यायन्ब्रह्मलोकंसमेत्यच । ज्ञानंचतुर्मुखात्प्राप्यमुच्यतेनात्रसंशयः ॥प्रश्न०॥५॥ कर्मेतिपुष्करःप्रोक्तउ ॥६७५॥
षानामाभिमानिनी । लोकाभिमानीपर्जन्यःस्वाहावैमंत्रदेवता । तपोभिमानीवह्निश्चवरुणोवीर्यदेवता । अ

न्नस्यदेवतासोमोमनोनामानिरुद्धकः। इंद्रियेशाश्चसूर्याद्याश्चक्षुराद्यभिमानिनः। रुद्रोवींद्रःशेषकामौमनस स्त्वेवदेवताः। श्रद्धेतिवायोःपत्नीस्यात्सर्वेषांप्रभवाप्यया। तस्याश्चकारणंप्राणःसर्वेषामुत्तमोत्तमः। तस्यापीशः कारणंचवासुदेवःपरोऽव्ययः। नतस्यसदृशःकश्चित्कुतएवोत्तमोभवेत्। तंज्ञात्वामुच्यतेजंतुर्विदित्वैवंपरात्प रमितितत्त्वविवेके। एतस्माज्जायतेप्राणोमनःसर्वेंद्रियाणिच। खंवायुर्ज्योतिरापःपृथिवीविश्वस्यधारिणीति मंत्रोक्तएवक्रमः। नहींद्रियेभ्योमनःपश्चात्। तत्प्राक्श्रुतेश्चेतिभगवद्वचनं। विष्णोःप्राणस्ततःश्रद्धातस्यारु द्रोमनोभिधः। तस्मादिंद्रस्त्विद्रियात्मातस्यसोमोन्नदेवता। ततश्चवरुणःसृष्टस्तस्मादग्निस्ततोवरः। आकाश देवताविघ्नस्ततोवायोःसुतोमरुत्। तस्मादग्निःपावकाख्यःप्रथमोग्नेस्सुतस्ततः। ततःपर्जन्यउद्भूतःस्वाहाऽतोमं त्रदेवता। उदकात्मकोबुधस्तस्याउषानामात्मिकाततः। ततःशनिःपृथिव्यात्माकर्मात्मापुष्करस्ततः। क्रमा त्प्रत्यवराएतेमुक्ताःसर्वगुणैरपि। नित्यमुक्तस्ततोविष्णुःप्राणादप्युत्तमोत्तमइतिच। समुद्रेइत्येवंप्रोच्यते। पुरु षेइत्येवंप्रोच्यते। भिद्येतेतासांनामरूपे। भिद्येतेचासांनामरूपेइत्युक्तत्वात्। अज्ञैरनवगतान्यपिसमुद्रेस्थि तानांनदीनांविष्णौस्थितानांमुक्तानांचभिन्नान्येवनामरूपाणिसंत्येवेत्यर्थः। नचभेदशब्दोनाशेप्रयुज्यमानः

क्वापिदृष्टः। घटादावपिबहुभावएवभेदशब्दःप्रयुज्यते। नाशस्त्वर्थतएवावगम्यते। नचात्रार्थतोपिनाशोव गम्यते। नहिनामानिरूपाणिचकपालवद्बहुधाभूतानितिष्ठंति। अतोभिद्येतेइतिपृथक्त्वमेवोच्यते। अरा इवरथनाभौकलायस्मिन्प्रतिष्ठिताइतिवाक्यशेषाच्च। अतःपुरुषेभिन्नानिनामरूपाणिप्रतिष्ठितानीत्येवार्थः। अस्तगमनंत्वादित्यवदज्ञानामविज्ञेयत्वमेव। प्राणादयःकलायस्मिन्मुक्तानित्यंप्रतिष्ठिताः। पृथक्पृथङ्नाम रूपैर्नमस्तस्मैपरायतइतिसत्तत्त्वे। नामरूपाद्विमुक्तइत्यनेनापिनामरूपाऽमुक्तत्वमुच्यते। विप्रियइत्यादिवत् नामरूपेअविहायेतिचपूर्वत्र। अनंतंवैनामानंताविश्वेदेवाइतिनामरूपयोरनंतत्वंहिश्रुतिर्वक्ति। यत्रपूर्वेसा ध्याःसंतिदेवाः। सतत्रपर्येतिजक्षन्क्रीडन्रममाणः। सोश्नुतेसर्वान्कामान्त्सहब्रह्मणाविपश्चिता। ऋचांत्वः पोषमास्तेपुपुष्वान्गायत्रंत्वोगायतिशक्करीष्वित्यादेश्च। अतःसर्वमुक्तेभ्योप्युत्तमोत्तमःपरिपूर्णोनारायणइ तिसिद्धं। नमोनमोस्तुहरयेप्रेष्ठप्रेष्ठतमायमे। परमानंदसंदोहसांद्रानंदवपुष्मते ॥ प्रश्न० ॥६॥ इतिश्रीम दानंदतीर्थभगवत्पादाचार्यविरचितंषट्प्रश्नोपनिषद्भाष्यंसंपूर्णं ॥ ६ ॥ श्रीकृष्णार्पणमस्तु ॥ ॥

॥ षट्प्रश्नभाष्यंसंपूर्णं ॥

The Credit of getting the Sarvamoola Books Scanned goes to Panditavareenya ityaadi birudankita Shreemajjaalihaala Shreenivaasaachaaryasya Vidyaa Suta, "Gomanjari" Udgrantha kartru, (Raghunatha suri virachita Manikya manjari granthasya Khandana Grantha) Veda Shaastra Puraanaartha Vishaarada, Panditavareenya Shree Dwarakaanaathaachaaryaru. My heartful salute for him to provide me such a wonderful opportunity to work on this project.

Project Started on : 21 December 2009
Project Completed on : 20 March 2011

Scanned By : Aravindacharya Haranahalli, aravindbharadwajhs@gmail.com